दुर्गा सप्तशती — अध्याय 13

Durga Saptashati — Chapter 13

Source: Selected 1894 Nirnaya Sagar core — chapter 13, printed pages 264–270. Also compared: Printed 1894 imprint — physical scan 7; Earlier Sanskrit comparison — catalogue date not accepted; Gita Press comparison only — no modern translation reproduced; Smithsonian — ancient Devi Mahatmya text context.

अध्याय 13 — मूल पाठ

TEXT POSITION 1

एतत्ते कथितं भूप देवीमाहात्म्यमुत्तमम्।
एवंप्रभावा सा देवी ययेदं धार्यते जगत्॥

etatte kathitaṃ bhūpa devīmāhātmyamuttamam|
evaṃprabhāvā sā devī yayedaṃ dhāryate jagat||

TEXT POSITION 2

विद्या तथैव क्रियते भगवद्विष्णुमायया।
तया त्वमेष वैश्यश्च तथैवान्ये विवेकिनः॥

vidyā tathaiva kriyate bhagavadviṣṇumāyayā|
tayā tvameṣa vaiśyaśca tathaivānye vivekinaḥ||

TEXT POSITION 3

मोह्यन्ते मोहिताश्चैव मोहमेष्यन्ति चापरे।
तामुपैहि महाराज शरणं परमेश्वरीम्॥

mohyante mohitāścaiva mohameṣyanti cāpare|
tāmupaihi mahārāja śaraṇaṃ parameśvarīm||

TEXT POSITION 4

आराधिता सैव नृणां भोगस्वर्गापवर्गदा।
मार्कण्डेय उवाच
इति तस्य वचः श्रुत्वा सुरथः स नराधिपः॥

ārādhitā saiva nṛṇāṃ bhogasvargāpavargadā|
mārkaṇḍeya uvāca
iti tasya vacaḥ śrutvā surathaḥ sa narādhipaḥ||

TEXT POSITION 5

प्रणिपत्य महाभागं तमृषिं संशितव्रतम्।
निर्विण्णोऽतिममत्वेन राज्यापहरणेन च॥

praṇipatya mahābhāgaṃ tamṛṣiṃ saṃśitavratam|
nirviṇṇo'timamatvena rājyāpaharaṇena ca||

TEXT POSITION 6

जगाम सद्यस्तपसे स च वैश्यो महामुने।
सन्दर्शनार्थमम्बाया नदीपुलिनसंस्थितः॥

jagāma sadyastapase sa ca vaiśyo mahāmune|
sandarśanārthamambāyā nadīpulinasaṃsthitaḥ||

TEXT POSITION 7

स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन्।
तौ तस्मिन्पुलिने देव्याः कृत्वा मूर्तिं महीमयीम्॥

sa ca vaiśyastapastepe devīsūktaṃ paraṃ japan|
tau tasminpuline devyāḥ kṛtvā mūrtiṃ mahīmayīm||

TEXT POSITION 8

अर्हणां चक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः।
निराहारौ यताहारौ तन्मनस्कौ समाहितौ॥

arhaṇāṃ cakratustasyāḥ puṣpadhūpāgnitarpaṇaiḥ|
nirāhārau yatāhārau tanmanaskau samāhitau||

TEXT POSITION 9

ददतुस्तौ बलिं चैव निजगात्रासृगुक्षितम्।
एवं समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः॥

dadatustau baliṃ caiva nijagātrāsṛgukṣitam|
evaṃ samārādhayatostribhirvarṣairyatātmanoḥ||

Note: The own-blood offering belongs to this ancient narrative. This reader does not instruct readers to harm themselves or imitate the act.

TEXT POSITION 10

परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चण्डिका।
देव्युवाच
यत्प्रार्थ्यते त्वया भूप त्वया च कुलनन्दन॥

parituṣṭā jagaddhātrī pratyakṣaṃ prāha caṇḍikā|
devyuvāca
yatprārthyate tvayā bhūpa tvayā ca kulanandana||

TEXT POSITION 11

मत्तस्तत्प्राप्यतां सर्वं परितुष्टा ददामि तत्।
मार्कण्डेय उवाच
ततो वव्रे नृपो राज्यमविभ्रंश्यन्यजन्मनि॥

mattastatprāpyatāṃ sarvaṃ parituṣṭā dadāmi tat|
mārkaṇḍeya uvāca
tato vavre nṛpo rājyamavibhraṃśyanyajanmani||

TEXT POSITION 12

अत्रैव च निजं राज्यं हतशत्रुबलं बलात्।
सोऽपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमानसः॥

atraiva ca nijaṃ rājyaṃ hataśatrubalaṃ balāt|
so'pi vaiśyastato jñānaṃ vavre nirviṇṇamānasaḥ||

TEXT POSITION 13

ममेत्यहमिति प्राज्ञः सङ्गविच्युतिकारकम्।
देव्युवाच
स्वल्पैरहोभिर्नृपते स्वं राज्यं प्राप्स्यते भवान्॥

mametyahamiti prājñaḥ saṅgavicyutikārakam|
devyuvāca
svalpairahobhirnṛpate svaṃ rājyaṃ prāpsyate bhavān||

TEXT POSITION 14

हत्वा रिपूनस्खलितं तव तत्र भविष्यति।
मृतश्च भूयः सम्प्राप्य जन्म देवाद्विवस्वतः॥

hatvā ripūnaskhalitaṃ tava tatra bhaviṣyati|
mṛtaśca bhūyaḥ samprāpya janma devādvivasvataḥ||

TEXT POSITION 15

सावर्णिको नाम मनुर्भवान्भुवि भविष्यति।
वैश्यवर्य त्वया यश्च वरोऽस्मत्तोऽभिवाञ्छितः॥

sāvarṇiko nāma manurbhavānbhuvi bhaviṣyati|
vaiśyavarya tvayā yaśca varo'smatto'bhivāñchitaḥ||

TEXT POSITION 16

तं प्रयच्छामि संसिद्ध्यै तव ज्ञानं भविष्यति।
मार्कण्डेय उवाच
इति दत्त्वा तयोर्देवी यथाभिलषितं वरम्॥

taṃ prayacchāmi saṃsiddhyai tava jñānaṃ bhaviṣyati|
mārkaṇḍeya uvāca
iti dattvā tayordevī yathābhilaṣitaṃ varam||

TEXT POSITION 17

बभूवान्तर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता।
एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः।
सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः॥

babhūvāntarhitā sadyo bhaktyā tābhyāmabhiṣṭutā|
evaṃ devyā varaṃ labdhvā surathaḥ kṣatriyarṣabhaḥ|
sūryājjanma samāsādya sāvarṇirbhavitā manuḥ||

अध्याय का समापन

COLOPHON

इति श्रीमार्कण्डेयपुराणे सुरथवैश्ययोर्वरप्रदानं नाम त्रयोदशोऽध्यायः॥१३॥

iti śrīmārkaṇḍeyapurāṇe surathavaiśyayorvarapradānaṃ nāma trayodaśo'dhyāyaḥ||13||